भ० कवचमंत्रस्य श्रीभैरवऋषिः अनुष्टुप्छंदः श्रीभवानीदेवता श्रीभवानीप्रीत्यर्थे
२ जपेपाठेविनियोगः ॐ ह्रीं श्रीं मे शिरः पायाद्देवी क्षेमंकरी सदा ललाटं पातु
3 मे लक्ष्मी नेत्रे मे पातु सुंदरी श्रुती मे पातु भीरुंडा जया नासां सदावतु विजया पा
तु मे गंडौ मुखं मे पातु चंडिका स्कंधौ मे पातु चामुंडा कंठं मे रक्तदंतिका स्तनौ मे
पातु वाग्देवी भुजौ मे पातु कुब्जिका हृदयं पातु मे तारा कुक्षिं मे पातु नारिणी पार्श्वौ
मे पातु मातंगी नाभिं मे तोतुला वतु शिश्नं मे पातु सुमुखी गुह्यं श्रीगुह्यकेश्वरी मेढ्रं
मे शारिका पातु कटिं मे पातु कालिका ऊरू मे पातु वाराही जानु मे शारदावतु जंघे
महाबला पायाद्गुल्फौ श्रीगुह्यकालिका पादौ मे संततं पातु देवी श्रीभद्रकालिका
पादस्तलं पादपृष्ठं पायान्मे त्रिपुरेश्वरी शिरसः पादपर्यंतं भवानी पातु मे वपुः।
विस्मारितं तु यत्स्थानं यत्स्थानं नामवर्जितं तत्सर्वं पातु मे देवी भवानी भयनाशि
नी प्रभाते पातु मां शांता मध्याह्ने कालरात्रिकाः अपराह्ने महामाया रात्रौ राज्ञी
सदावतु अर्धरात्रे जगन्माता निशांते बगुलामुखी राजराजेश्वरी बद्धं बोधं पा
तु नु मां शिवा व्रजंतं पातु मे दुर्गा तिष्ठंतं पार्वती तथा निषण्णं पातु मां नित्यं देवी
त्रिपुरभैरवी रणे राजकुले द्यूते विवादे शत्रुसंसदी भूतप्रेतपिशाचेषु रक्षेन्मां प
रमेश्वरी इतीदं कवचं दिव्यं त्रिषु लोकेषु दुर्लभं यत्र तत्र न दृष्टव्यं यस्य कस्य न देय २

© Dharmartha Trust J&K. Digitized by eGangotri

सू० ७

[illegible]

ली आद्याभवानी सर्वस्वं पुण्यं श्री पुण्यवर्द्धनं सर्वापराय शमनं कीर्त्तिपुत्रधनप्र
दं सकृदुच्चारमात्रेण भुक्तिमुक्तिफलप्रदं पठनाद्धारणात्सत्यं सर्वान्कामान्नरो ल
भेत् गोप्यं गुप्ततरं साक्षात्कलौ निर्वाणदायकं भवान्याः कवचं भक्त्या गोपनीयं
स्वयोनिवत् इति श्री रुद्रयामले तंत्रे भैरवसंवादे भवानी कवचं संपूर्णं २२ ॥ ॥
श्री सूर्यायनमः ॐ सप्ताश्वरथमारूढो अरुणः सारथी समः श्वेतपद्मधरं देवं
त्वं सूर्यं प्रणमाम्यहं १ बंधूकपुष्पसंकाशं हारकुंडलभूषितं एकचक्रधरं देवं त्वं
सूर्यं० २ लोहितावर्णसंकाशं सर्वलोकपितामहं सर्वव्याधिहरं देवं त्वं सू० ३ ॥
त्वं देवं ईश्वरं शाक्रं ब्रह्माविष्णुमहेश्वरं परंब्रह्म परंज्ञानं त्वं सूर्यं० ४ त्वं पृथ्वी आ
पते जश्च वायुस्त्वा आकाशमेव च सर्वेशं श्री जगन्नाथं त्वं सूर्यं० ५ त्वं देवं लोककर्
त्तारं कीर्त्तिकारणशोकरं रुद्रतेजोधरं देवं त्वं सूर्यं० ६ अखंडमंडलाकारं जरा
जन्मविवर्जितं गगने लिंगमाराध्यं त्वं सूर्यं० ७ निर्मलं निर्विकल्पं च निर्विका
रो निरामयं जगत्कर्त्ता जगद्धर्त्ता त्वं सूर्यं० ८ सूर्यस्तोत्रं पठेन्नित्यं ग्रहपीडाविः
नाशनं धनं धान्यं मनोवांछा श्रेयः प्राप्नोति नित्यशः ९ शिवरात्रीसहस्राणि
कृत्वा जागरणं भवेत् तत्पुण्यं लभते सर्वं तत्फलं प्रणमाम्यहं १० अश्वमेधसह
स्राणि वाजपेयशतानि च कन्याकोटिसहस्राणि तत्फलं प्र० ११ गयायां पिंडदा
नेन पितृणां च समुद्धरं दृष्ट्वा जागेश्वरं देवं त्वं० १२ अजेश्वरसमं प्रेतं सोमनाथं तथैव चाः
किंकर्त्तो भावो पोषितं रविवासरे नव्याधिं चनवा कष्टं सूर्य लोके स गच्छति १३ इति श्री वारा
पुराणे सूर्यस्तो[illegible]नारायणोय

४

© Dharmartha Trust J&K. Digitized by eGangotri

© Dharmartha Trust J&K. Digitized by eGangotri